**सप्तमः पाठः**

# वयं भारतीयाः

*[ प्रस्तुत पाठ 'राष्ट्रीय एकता' की भावना पर आधारित है। हम सब भारतीय हैं। भारतीयता ही हमारी पहचान होनी चाहिए। सभी धर्म वस्तुत: एक हैं, उन सबका गन्तव्य एक ही है, यद्यपि उस परम सत्य तक पहुँचने के मार्ग भिन्न-भिन्न हैं। एक ही ईश्वर विभिन्न धर्मावलम्बियों के द्वारा विविध रूपों में स्मरण किया जाता है। सभी धर्मों में 'मानव-कल्याण' का पक्ष ही प्रधान है। सदाचार एवं नैतिकता को सभी धर्मों में प्रमुखता दी गयी है। दया, करुणा, परोपकार, त्याग ये ऐसे मानवीय गुण हैं जिनकी शिक्षा सभी धर्मों में प्रमुखता से दी गयी है। हिन्दू, मुस्लिम, सिख, ईसाई आदि सभी की रगों में समान रक्त प्रवाहित होता है। अतएव हमें आपस में मिलकर रहना चाहिए। ]*

**(ततः प्रविशति अध्यापकः कक्षायां, सर्वे छात्राः आदरार्थम् उत्तिष्ठन्ति)**

**अध्यापकः –** भो: छात्रा:। अद्याहं सामान्यज्ञानविषयकं प्रश्नं पृच्छामि। आफताब! कथय महात्मनो बुद्धस्य चरितविषये त्वं किं जानासि?

**आफताबः –** महात्मा बुद्धः बाल्यादेव अतिचिन्तनशील:, परमकारुणि-कश्चासीद्। संसारगतदु:खस्य परिहार: कथं स्यादिति सदैव चिन्तयति स्म। स: धार्मिकपाखण्डस्य खण्डनं चकार। महात्मनो बुद्धस्योपदेशा: सर्वसाधारणस्य कृतेऽपि उपादेया: सिध्यन्ति। अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा: इति पञ्चधर्मा: तेन मनुष्याणां कृते निर्धारिता:।

**अध्यापकः –** जसविन्दर! ईसामसीह: मानवान् किमुपादिशत्।

**जसविन्दरः –** ख्रीष्टधर्मप्रवर्तक: ईसामसीह: आर्त्तजनानां आर्तिहरणाय निर्धनजनानां कल्याणाय, रोगपीडितानाश्च परित्राणाय लोकमुपदिशति स्म। यथा विद्वेषो विद्वेषं, विरोधो विरोधं जनयति तथैव स्नेह: स्नेहं वर्धयति। यदि कश्चिद् जनोऽस्माकं हानिं जनयति तदा तस्य प्रतीकारो वैरबुद्धया न कर्त्तव्य:। मानवताया: सेवैव भगवत: सेवेति तस्योपदेशवचनानि सन्ति। स: दीनदुखितानां सेवायामेव ईश्वरस्य साक्षात्कारं करोति स्म।

**अध्यापकः –** दीपक! गुरुगोविन्दसिंह: किमर्थं पूज्य:?

**दीपकः –** सिखधर्मस्य दशमो गुरु: गुरुगोविन्दसिंह: जन्मभूमे: रक्षार्थं देशभक्तिभावनया आत्मोत्सर्गमकरोत्। तेन वीरताया:, त्यागस्य, आत्मोत्सर्गस्य चाप्रतिमं निदर्शनमपिकृतम्।

**(कक्षा विसर्जिता। मध्याहनसमयः सञ्जातः। छात्राः स्वल्पाहारार्थं इतस्ततः तिष्ठन्ति।)**

**आफताबः –** दीपकजसविन्दरौ आगच्छतम्। वयं भोजनं करिष्याम:।

(दीपक: तस्मै प्रत्युत्तरं न ददाति अपित्वपसर्पति।)

**जसविन्दरः –** (सर्वेषां बालकानां मुखान्यवलोकयति, अश्रूणिप्रवाहयति) अद्य मम पार्श्वे भोजनाय किञ्चिदपि नास्ति। निर्धनोऽहं क्षुत्प्रपीडितोऽस्मि। (इति रोदिति।)

(आफताब: तं समाश्वासयति। पीटर: स्वभोजनं जसविन्दराय ददाति च। क्षुत्प्रपीडितो जसविन्दर: भोजनं करोति। कतिपयदिवसानन्तरं परीक्षासारिणीं दृष्ट्वा ते परस्परं वार्तालापं कुर्वन्ति।)

**जसविन्दरः –** अर्द्धवार्षिकी परीक्षा अतिनिकटास्ति किन्तु मम पार्श्वे परीक्षाशुल्कप्रदानाय धनं नास्ति। मम पिता अकस्माद् अतिरुग्णः जातः। यत्किञ्चिदपि द्रव्यं मम पार्श्वे आसीत् तदपि तस्य चिकित्सायां व्ययितम्।

**पीटरः –** अहं तव परीक्षाशुल्कं दास्यामि। भगवतः प्रसादेन मम पितुः पार्श्वे प्रभूतं धनं वर्तते।

**जसविन्दरः –** अद्य दीपको न लक्ष्यते। कदाचित् सः विद्यालयं नागतः। मन्ये, सः चलचित्रावलोकनाय गतः स्यात्।

**पीटरः –** मैवं भण। अद्य केनापि दुष्टबालकेन तस्योपरि बम्बप्रक्षेपः कृतः, तीव्रया रुधिरधारया तस्य मुखं रञ्जितासीत्। तस्य शल्यचिकित्सायाः कृते रक्तमपेक्षते किन्तु तद्वर्गस्य रक्तं नोपलभ्यते। हन्त! तस्य बान्धवजनानामपि रक्तं दीपकस्य रक्तेन सह साम्यं न भजते। अपरः कोऽपि जनः स्वकीयं रुधिरं दातुं न तत्परः। येन केनापि व्याजेन जनाः विरमन्ति।

**आफताबः –** किमिदम्। हन्त! दीपकोपरि बम्बप्रक्षेपः । महत् कष्टम्। तर्हि अहं शीघ्रमेव तं द्रष्टुमिच्छामि।

**जसविन्दरः –** सन्तोषस्य विषयः यत् परमेश्वरस्य प्रसादेन सः जीवति।

**पीटरः –** तस्य शल्यचिकित्सा रक्तमपेक्षते। रक्तं कुतः लब्धं स्यात् साम्प्रतमिदं चिन्तनीयम् किन्तु दुष्करमिदं प्रतिभाति।

**आफताबः –** अहं स्वप्राणान् पणीकृत्यापि तस्य जीवनं रक्षिष्यामि। किन्तु झटितिकरणीयमिदं कार्यम्। अयमहं रक्तदानाय प्रस्तुतः। पीटर! दीपकः इदानीं कुत्रास्ति? किमिदं जानासि?

**पीटरः –** चिरञ्जीवचिकित्सालये।

(आफताबः जसविन्दरेण सह चिरञ्जीवचिकित्सालयं गच्छति। दीपकः तत्र पर्यङ्कोपरि अर्धचेतन इव दृश्यते। चिन्तानिमग्नौ तस्य पितरौ तमुभयतः तिष्ठतः।)

**आफताबः –** प्रविष्य, समीपमुपसृत्य अभिवादयति।

**जसविन्दरः –** नमस्करोम्यहम्।

(दीपकस्य पिता आशीर्वचनं ददाति, तस्य माता अश्रूणि मुञ्चति।)

**आफताबः –** तात समाश्वसिहि। समाश्वसित्वम्बा।

**जसविन्दरः –** धैर्यं न त्याज्यं विधुरेऽपि काले। भगवतः प्रसादेन सर्वं कुशलं भविष्यति।

**दीपकस्य पिता–** (समीपमुपसृत्य) वत्स दीपक! इमौ तव सुहृदवरौ समायातौ।

**दीपकः –** (पार्श्वान्तरं विधाय, अवलोक्य च) स्वागतम् (इत्यर्धोक्ते इव मूर्छति)

**आफताबः –** अहं रक्तदानाय आगतोऽस्मि।

**दीपकस्य माता–** किं तस्मै स्वकीयान् प्राणान् दातुं समुद्यतः?

**दीपकस्य पिता–** इयं भवतः महती अनुकम्पा किन्तु ......।

**आफताबः –** (वचनमाक्षिप्य) इदानीं प्राणानां मोहः नैव कर्त्तव्यः। मित्रमेव जनस्य सर्वदा साहाय्यं विदधाति, सर्वं मनस्तापम् आधिं व्याधिं वा हरति।

(ततः चिकित्सकः आगच्छति, आफताबस्य रक्तनिरीक्षणं करोति च। तस्य रक्तं दीपकस्य रक्तवर्गस्यैव निर्गच्छति। आफताबः सहर्षं स्वरक्तं दीपकाय ददाति, तस्य जीवनमेव रक्षति। सर्वे आनन्दमनुभवन्ति।))।

**जसविन्दरः –** मित्र दीपक! त्वं येन सह कदापि भोजनं नाकरोत् तस्यैव आफताबस्य रक्तदानेनैव त्वं जीवनमलभः।

**दीपकः –** मित्र आफताब! साधु, श्लाघनीयम् तवाचरणम्। त्वं वस्तुतः मम सन्मित्रमसि।

**जसविन्दरः –** **"आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।"**

कतिपयदिवसानन्तरं आफताबः दीपकस्य गृहं गच्छति।

**आफताबः –** मित्र दीपक! श्वः मम ईदमहोत्सवो भविष्यति। किं त्वं मम गृहम् आगमिष्यसि?

**दीपकः –** अवश्यमेव आगमिष्याम्यहम्। मित्र! अहं तु पूर्वमेव लज्जितोऽस्मि। मया त्वया सह समुचितं नाचरितम्।

(सुन्दराणि वस्त्राणि धारयित्वा तस्य मित्राणि आफताबस्य गृहं गच्छन्ति। तत्र ते परस्परमालिङ्गन्ति। आफताबः तान् दीर्घसूत्रिकामिष्टान्नानि भोजयति।)

**दीपकः –** ईदमहोत्सवः जनेषु भ्रातृभावं वर्धयति, वर्गविभेदं, जातिभेदं, धनिकनिर्धनभेदं च दूरीकरोति। दिवसेऽस्मिन् जनाः परस्परद्वेषभावं विहाय "सर्वे वयं भ्रातरः" इति शोभनभावनया परस्परमा-लिङ्गन्ति।

**(ते सर्वे स्वगृहं गच्छन्ति)**

(कतिपयमासानन्तरं होलिकोत्सवः आयाति। आफताबः होलिकायाः साधुवादं दातुं दीपकस्य गृहं गच्छति।)

**दीपकः –** मित्र आफताब! माम् गाढं परिष्वजस्व। तौ प्रीत्या परस्परमालिङ्गतः। दीपकः तं विविधानि व्यञ्जनानि भोजयति।

**आफताबः –** होलिकोत्सवस्य उल्लासमयः कालः कस्य मनो नावर्जयति। सकला गृहवीथिकामार्गाः मनोहरगुलालादिरञ्जनरागरञ्जिताः भवन्ति।

**दीपकः –** सत्यमेव। गगने पटवासः प्रसरति, मनसि प्रीतिः जायते। जनाः 'पिचकारीयन्त्रेण' जनेषु न केवलं अबीरगुलालकुङ्कुमादीनां रागानां जलं प्रक्षिपन्ति, अपितु स्नेहस्य वृष्टिं कुर्वन्ति।

**आफताबः –** यथा ईदमहोत्सवे तथैव होलिकोत्सवेऽपि जनाः परस्परद्वेषादीन् परित्यज्य महता सौहार्देन परस्परमालिङ्गन्ति। महोत्सवोऽयं जनेषु प्रेमभावं सद्भावं च जनयति।

**दीपकस्य पिता–** भो बालकाः! विविधानां धर्माणां मार्गाः विविधाः, किन्तु तेषां गन्तव्यमेकमेव। सर्वेषां जनानां शिरासु समानमेव रक्तं प्रवहति। संसारस्य सर्वेऽपि मानवाः समानाः। सर्वेषां धर्माणां सारभूततत्त्वानां एकत्रसञ्चयेनैव विश्वधर्मत्वं सम्भवति।

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति गीतायामप्युक्तम्।

# अभ्यास प्रश्न

1. **निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–**

(क) जनाः दशरथपुत्रं रामं कस्य प्रतीकं मन्यन्ते? **(2020MS)**

(ख) विजयादशमी महोत्सवः किं शिक्षयति? **(2020MR)**

(ग) गुरु गोविन्दसिंहः किमर्थं पूज्यः?

(घ) ईसामसीहः मानवान् किमुपादिशत्?

(ङ) ईदमहोत्सवे जनाः किं कुर्वन्ति?
(च) सन्मित्रलक्षणं किमस्ति?
(छ) आफताबः दीपकस्य जीवनरक्षार्थम् किमकरोत्?
(ज) स्वस्थे सति दीपकः आफताबं किमकथयत्?
(झ) ईदमहोत्सवः जनेषु किं वर्धयति?
(ञ) रामः कस्य पुत्रः आसीत्?
(ट) होलिकोत्सवे जनाः केन भावेन आलिङ्गन्ति?
(ठ) सिखधर्मस्य दशमोगुरुः कः आसीत्?

2. 'वयं भारतीया' पाठ का सारांश लिखिए।
3. पाठ के आधार पर आफताब का चरित्र-चित्रण कीजिए।
4. 'वयं भारतीयाः' नाटक के आधार पर दीपक का चरित्र-चित्रण कीजिए। **(2018HT, 19AQ, 20MQ, MT)**
5. 'वयं भारतीयाः' पाठ के आधार पर अध्यापक का चरित्र-चित्रण कीजिए।

# वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए–**

1. **जनाः दशरथपुत्रं रामं कस्य प्रतीकं मन्यते–**
(क) त्यागस्य (ख) सदाचारस्य
(ग) मर्यादायाः (घ) वैराग्यस्य

2. **गुरुगोविन्दसिंह कस्य रक्षणाय आत्मोत्सर्गम् कृतवान्–**
(क) जन्मभूमेः रक्षार्थं (ख) स्वपरिवारस्य रक्षार्थं
(ग) धर्मस्य रक्षार्थं (घ) स्वप्रदेशस्य रक्षार्थं

3. **ईदमहोत्सवे जनाः .............।**
(क) कोलाहलं कुर्वन्ति (ख) मौनं भवन्ति
(ग) शोभन भावनया परस्परमालिङ्गन्ति (घ) न्यूनं खादन्ति

4. **होलिकोत्सवे जनाः ............... वृष्टिं कुर्वन्ति।**
(क) क्रोधस्य (ख) स्नेहस्य (ग) धनस्य (घ) जलस्य

5. **दीपकस्य जीवन रक्षार्थं .............रक्तदानम् अकरोत्।**
(क) आफताबः (ख) जसविन्दरः (ग) पीटरः (घ) गोविन्दः

6. **सन्मित्रं सर्वदा .............करोति।**
(क) सहायतां (ख) विरोधम् (ग) मैत्रीम्

7. **सिख धर्मस्य दशमो गुरुः .................. आसीत्।** **(2018HP)**
(क) गुरु नानकः (ख) गुरु रामदासः
(ग) गुरु तेग बहादुरः (घ) गुरु गोविन्द सिंहः

## ➠ आन्तरिक मूल्यांकन

'मानव-कल्याण' के लिए आप क्या-क्या करना चाहेंगे? संक्षेप में लिखिए।

●